# Shri Bala Stotram 7

# श्रीबालास्तोत्रं ७

## Document Information

Text title : Shri Bala Stotram 7

File name : bAlAstotram7.itx

Category : devii, dashamahAvidyA, devI

Location : doc_devii

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : bAlAsaparyA saparyAkrama-nAmAvalI-stotrAdisaNgrahaH

Latest update : March 21, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

March 22, 2020

*sanskritdocuments.org*

# श्रीबालास्तोत्रं ७

श्रीभैरवः -
अधुना देवि बालायाः स्तोत्रं वक्ष्यामि पार्वति ।
पञ्चमाङ्गं रहस्यं मे श्रुत्वा गोप्यं प्रयत्नतः ॥ १॥

अरुणकिरणजालैरञ्जिताशावकाशा
  विधृतजपवटीका पुस्तकाभीतिहस्ता ।
इतरकरवराढ्या फुल्लकह्लारसंस्था
  निवस्तु हृदि बाला नित्यकल्याणशीला ॥ २॥

वाणीं जपेद्यस्त्रिपुरे भवान्या बीजं निशीथे जडभावलीनः ।
भवेत्स गीर्वाणगुरोर्गरीयान् गिरीशपत्निप्रभुतादि तस्य ॥ ३॥

कामेश्वरि त्र्यक्षरीकामराजं जपेद्दिनान्ते तव मन्त्रराजम् ।
रम्भापि जम्भारिसभां विहाय भूमौ भजेत्तं कुलदीक्षितं च ॥ ४॥

तार्तीयकं बीजमिदं जपेद्यस्त्रैलोक्यमातस्त्रिपुरे पुरस्तात् ।
विधाय लीलां भुवने तथान्ते निरामयं ब्रह्मपदं प्रयाति ॥ ५॥

धरासद्मत्रिवृत्ताष्टपत्रषट्कोणनागरे ।
बिन्दुपीठेऽर्चयेद्बालां योऽसौ प्रान्ते शिवो भवेत् ॥ ६॥

इति मन्त्रमयं स्तवं पठेद्यस्त्रिपुराया निशि वा निशावसाने ।
स भावेद्भुवि सार्वभौममौलिस्त्रिदिवे शक्रसमानशौर्यलक्ष्मीः ॥ ७॥

इतीदं देवि बालायाः स्तोत्रं मन्त्रमयं परम् ।
अदातव्यमभक्तेभ्यो गोपनीयं स्वयोनिवत् ॥ ८॥

इति रुद्रयामलान्तर्गतं श्रीबालास्तोत्रं (७) सम्पूर्णम् ।

Proofread by PSA Easwaran

*Shri Bala Stotram 7*

pdf was typeset on March 22, 2020

Please send corrections to *sanskrit@cheerful.com*